# .. shrI kamalA kavacham ..

# ॥ શ્રીકમલાકવચમ્ ॥

## Document Information

Text title : kamalAkavacham.h
File name : shriikamalaakavach.itx
Category : kavacha
Location : doc_devii
Author : Traditional
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : WebD
Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
Description-comments : vishvasAratantra
Latest update : August 18, 2004
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 3, 2016

*sanskritdocuments.org*

# ॥ શ્રીકમલાકવચમ્ ॥

શ્રીગણેશાય નમઃ ।
ૐ અસ્યાશ્ચતુરક્ષરાવિષ્ણુવનિતાયાઃ
કવચસ્ય શ્રીભગવાન્ શિવ ઋષીઃ ।
અનુષ્ટુપ્છન્દઃ । વાગ્ભવા દેવતા ।
વાગ્ભવં બીજમ્ । લજ્જા શક્તિઃ ।
રમા કીલકમ્ । કામબીજાત્મકં કવચમ્ ।
મમ સુકવિત્વપાણ્ડિત્યસમૃદ્ધિસિદ્ધયે પાઠે વિનિયોગઃ ।
ઐઙ્કારો મસ્તકે પાતુ વાગ્ભવાં સર્વસિદ્ધિદા ।
હ્રીં પાતુ ચક્ષુષોર્મધ્યે ચક્ષુર્યુગ્મે ચ શાઙ્કરી ॥ ૧॥

જિહ્વાયાં મુખવૃત્તે ચ કર્ણયોર્દન્તયોર્નસિ ।
ઓષ્ઠાધારે દન્તપઙ્ક્તૌ તાલુમૂલે હનૌ પુનઃ ॥ ૨॥

પાતુ માં વિષ્ણુવનિતા લક્ષ્મીઃ શ્રીવર્ણરૂપિણી ॥

કર્ણયુગ્મે ભુજદ્વન્દ્વે સ્તનદ્વન્દ્વે ચ પાર્વતી ॥ ૩ ॥

હૃદયે મણિબન્ધે ચ ગ્રીવાયાં પાર્શ્વયોર્દ્વયોઃ ।
પૃષ્ઠદેશે તથા ગુહ્યે વામે ચ દક્ષિણે તથા ॥ ૪॥

ઉપસ્થે ચ નિતમ્બે ચ નાભૌ જંઘાદ્વયે પુનઃ ।
જાનુચક્રે પદદ્વન્દ્વે ઘુટિકેઽઙ્ગુલિમૂલકે ॥ ૫॥

સ્વધા તુ પ્રાણશક્ત્યાં વા સીમન્યાં મસ્તકે તથા ।
સર્વાઙ્ગે પાતુ કામેશી મહાદેવી સમુન્નતિઃ ॥ ૬॥

પુષ્ટિઃ પાતુ મહામાયા ઉત્કૃષ્ટિઃ સર્વદાઽવતુ ।
ઋદ્ધિઃ પાતુ સદા દેવી સર્વત્ર શમ્ભુવલ્લભા ॥ ૭॥

વાગ્ભવા સર્વદા પાતુ પાતુ માં હરગેહિની ।
રમા પાતુ મહાદેવી પાતુ માયા સ્વરાટ્ સ્વયમ્ ॥ ૮॥

સર્વાઙ્ગે પાતુ માં લક્ષ્મીર્વિષ્ણુમાયા સુરેશ્વરી ।
વિજયા પાતુ ભવને જયા પાતુ સદા મમ ॥ ૯॥

શિવદૂતી સદા પાતુ સુન્દરી પાતુ સર્વદા ।
ભૈરવી પાતુ સર્વત્ર ભેરુણ્ડા સર્વદાઽવતુ ॥ ૧૦॥

ત્વરિતા પાતુ માં નિત્યમુગ્રતારા સદાઽવતુ ।
પાતુ માં કાલિકા નિત્યં કાલરાત્રિઃ સદાઽવતુ ॥ ૧૧॥

નવદુર્ગાઃ સદા પાતુ કામાખ્યા સર્વદાઽવતુ ।
યોગિન્યઃ સર્વદા પાતુ મુદ્રાઃ પાતુ સદા સમ ॥ ૧૨॥

માત્રાઃ પાતુ સદા દેવ્યશ્ચક્રસ્થા યોગિની ગણાઃ ।
સર્વત્ર સર્વકાર્યેષુ સર્વકર્મસુ સર્વદા ॥ ૧૩ ॥

પાતુ માં દેવદેવી ચ લક્ષ્મીઃ સર્વસમૃદ્ધિદા ॥

॥ ઇતિ વિશ્વસારતન્ત્રે શ્રીકમલાકવચં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

.. shrI kamalA kavacham ..
was typeset on August 3, 2016

Please send corrections to *sanskrit@cheerful.com*